# कर्नाटकसंस्कृतविश्वविद्यालयस्य
# द्वितीयदीक्षान्तघटिकोत्सवे

कुलपतिना

प्रो. मल्लेपुरं जि. वेङ्कटेशमहोदयेन

प्रस्तुतं

# स्वागतभाषणम्

१४.०६.२०१३

ज्ञानज्योतिसभाङ्गणम्, बेङ्गलूरु

# स्वागतभाषणम्

कर्नाटकसंस्कृतविश्वविद्यालयस्य द्वितीयदीक्षान्तघटिकोत्सवस्य हर्षकरे अवसरेऽस्मिन् अस्मदाह्वानमङ्गीकृत्य समुपस्थितानां समेषां भवतां शुभोदयं, नमःसुमाञ्जलिपूर्वकं स्वागतं च व्याहरामि ।

महामहिमशालिनः कर्नाटकराज्यपालाः अस्मद्विश्वविद्यालयस्य कुलाधिपतयः डा. हंसराज् भारद्वाज् महोदयाः, आदरणीयाः कर्नाटकसर्वकारस्य उन्नतशिक्षणसचिवस्थानमलङ्कुर्वाणाः अस्मद्विश्वविद्यालयस्य सहकुलाधिपतयः श्रीमन्तः आर्.वि. देशपाण्डेमहाभागाः, सम्मान्याः सारस्वतातिथयः विद्वद्वरेण्याः विवेकानन्दयोगानुसन्धानविश्वविद्यालयस्य कुलपतयः डा. रामचन्द्रभट्टाः कोटेमने, सम्मानोपाधिं स्वीकर्तुमत्र समुपस्थिताः परमश्रद्धेयाः चत्वारः विद्वच्चतुर्मुखाः, अस्माकं विश्वविद्यालयस्य प्रशासनसमिति-प्रशिक्षणपरिषत्-सदस्याः, मम सहकर्मिणः, अध्यापकाः, छात्राः, माध्यममित्राणि, अतिथयश्च।

अयम् अस्माकं विश्वविद्यालयस्य द्वैतीयकः दीक्षान्तघटिकोत्सवः । गतवर्षे महता सम्भ्रमेण प्रथमदीक्षान्तघटिकोत्सवः अस्माकं राज्यपालानाम् आशीर्भिः राजभवने सञ्चालितः । द्वितीयदीक्षान्तघटिकोत्सवं प्रति समागतान् आदरेण च कुलाधिपतीन् महामहिमशालिनः राज्यपालान् श्रीमतः डा. हंसराज् भारद्वाजमहोदयान् स्वागतवचोभिः समर्चये । श्रीमन्तः आदर्शमानवगुणानां भारतीय-ज्ञानविज्ञानराशेः संस्कृतेश्च मूर्तिरूपाः । स्वतन्त्रभारतगणराज्यस्य

राज्यसभासदस्यरूपेण केन्द्रमन्त्रिमण्डले न्यायिकमन्त्रालयस्य मन्त्रिरूपेण च चतुर्भ्यः दशकेभ्यः सेवां व्यतन्वन् । भारतस्य श्रेष्ठेषु राजनीतिज्ञेषु अन्यतमा एते हर्याणराज्ये रोहतकप्रान्ते गर्हीनामके ग्रामे १९३७तमे वर्षे मेमासस्य १७दिने जनिं लेभिरे । बाल्ये तत्रैव प्राप्तशिक्षणाः पञ्जाबविश्वविद्यालयतः स्नातकोत्तरपदवीं प्राप्य आग्राविश्वविद्यालये न्यायविषये पदवीं सम्प्रपेदिरे । एतेषां महोदयानां न्यायक्षेत्रे विशिष्टं योगदानम् उपलक्ष्य नैकविश्वविद्यालयेभ्यः गौरवडाक्टरेट् उपाधिः संप्रदत्तः । भारतीयतत्त्वशास्त्रे संस्कृते संस्कृतौ च एतेषाम् अभिरुचिः अनितरसाधारणी । तेषां संस्कृतानुरागः विद्वत्ता च अस्माकं सर्वदैव प्रेरणां जनयति । एतादृशानां महानुभावानां कौलाधिपत्यं सर्वप्रकारेण अस्मद्विश्वविद्यालयस्य अतितरां शोभां वर्धयति इति मोमुद्यते नः चेतः । विश्वविद्यालयस्य ऐतिहासिकेऽस्मिन् वार्षिकदीक्षान्तघटिकोत्सवे तत्रभवत्सु भवत्सु समेषां पक्षतः स्वागतं सुस्वागतं, कार्यक्रमस्य आध्यक्ष्यं स्वीकर्तुं प्रार्थना च । भवतां मार्गदर्शनम् आशिषश्च काङ्क्षामहे ।

अवसरेऽस्मिन् अस्मदाह्वानमङ्गीकृत्य समायातानां सहकुलाधिपतीनाम् कर्नाटकसर्वकारस्य उन्नतशिक्षामन्त्रिवर्याणां श्रीमतां आर्.वि. देशपाण्डेमहोदयानां सामोदं सादरं स्वागतं व्याहरामि । श्रीमन्तः आर्.वि. देशपाण्डेमहोदयाः अस्माकं राज्यस्य ज्येष्ठेषु प्रेष्ठेषु नायकेषु क्रियाशीलाः चिन्तनशीलाश्च उदात्तनायकाः । मितभाषिणोऽपि अमितकर्माणः । गतेभ्यः त्रिंशद्वर्षेभ्यः राज्यस्य अभिवृद्धौ समृद्धौ तेषामस्ति महद् योगदानम् । अचिराद् उन्नतशिक्षाविभागस्य मन्त्रिपदग्रहणम् अनु उन्नतशिक्षणे नैकविधनवीनोपक्रमान् समानीतवन्तः इत्येतत् तेषां क्रियाशीलत्वं दूरदर्शित्वं च दर्शयति । अस्माकं विश्वविद्यालयस्यापि अभिवृद्ध्यै तेषां योगदानम् अस्तु इति आशासे । श्रीमन्तः, भवतां प्रोत्साहेन उपस्थित्या च महोत्सवस्यास्य महत्त्वं वर्धितम् । तदर्थं भवताम् आधमर्ण्यकथनपूर्वकं पुनरेकवारं स्वागतं करोमि ।

अद्य अस्माकं समेषां भाग्यवशात् सम्प्राप्ताः दिगन्तविश्रान्तकीर्तयः प्राच्यप्रतीच्यविद्याविशारदाः विवेकानन्दयोगानुसन्धानकेन्द्रस्य



मानितविश्वविद्यालयस्य कौलपत्येन शोभमानाः डा. कोटेमने रामचन्द्रभट्टवर्याः वेदवेदान्तादिशास्त्रेषु अद्वितीयविद्वांसः, गुरुकुलवासिनः आचार्याः तपस्विनः विशिष्टाः वाग्मिनः च । एते मध्यप्रदेशसर्वकारात् दीयमानात् भवभूतिपुरस्कारात्, विद्यावारिधि इति बेङ्गलूरुनगरतः, तथा स्वर्णवल्लीसंस्थानात् आचार्यप्रवरेति पुणेनगरतः गुरुगौरव इत्यादि गौरवसम्मानानि प्राप्तानि । जनसेवारताः, वेदविज्ञानप्रचारप्रसारनिरताः, परोपकारिणः, पण्डितप्रियाः, एतादृशाः सन्तः सन्ति कियन्तः ? एतेभ्यः गौरवपुरस्कारं नमोवाकं प्रशास्महे ।

उत्तरकन्नडमण्डलस्य कोटेमनेनामकग्रामे १९४९तमे वर्षे लब्धजन्मानः रामचन्द्रभट्टवर्याः आबाल्यात् संस्कृतविद्यायां प्राप्तप्रवेशाः अद्वैतवेदान्ते विद्वत्पदवीं समार्जयन् । ततश्च कानिचित् वर्षाणि अद्वैतवेदान्तम् अध्याप्य, बेङ्गलूरु जनपदे जनसेवाविद्याकेन्द्रे विंशतिवर्षाणि संस्कृतमध्यापयन्तः प्राचार्याः आसन् । ततश्च द्वादशवर्षाणि वेदविज्ञानगुरुकुलस्य प्राचार्यपदमपि अलञ्चक्रुः । बह्वीषु राष्ट्रियान्ताराष्ट्रिययगोष्ठीषु शोधप्रबन्धं वाचयामासुः । बेङ्गलूरुनगरस्य चन्नेनहळ्ळीप्रान्ते दक्षिणामूर्तिगिरौ वेदविज्ञानगुरुकुलं प्रतिष्ठाप्य तत्र छात्रान् शास्त्राणि अध्यापयामासुः । तत्र शोधकेन्द्रमपि भट्टाचार्याणां मार्गदर्शने प्रवर्तते । बहोः कालात् विवेकानन्दयोगानुसन्धानकेन्द्रस्य सङ्कायप्रमुखाः रामचन्द्रभट्टमहोदयाः अधुना तस्यैव विश्वविद्यालयस्य कौलपत्ये प्रतिष्ठापिताः ।

समकालीनविद्वत्सु अग्रगण्यानाम् भट्टमहोदयानां सादरं सप्रणामं स्वागतं समर्पयामि । तानहम् अनुरुन्धे स्वीयेन उद्बोधकेन दीक्षान्तभाषणेन सभामिमां तोषयन्तु इति ।

वेदिकायां समासीनान् सुरभारतीसेवाधुरन्धरान् वयसा ज्ञानेन कर्मणा च वृद्धान् अस्माकं सर्वथा पूजनीयान् विद्वद्वरेण्यान् स्वागतवचोभिः अर्चयितुं नितरां धन्यतामनुभवामि ।

अविच्छिन्नन्यायवेदान्तशास्त्रपाठसम्प्रदायस्य प्रवर्तकाः सदाचारनिष्ठाः आचार्य-भालचन्द्रशास्त्रिणः, वेदमीमांसादिशास्त्रमर्मज्ञाः आचार्य-

नारायणशास्त्रिणः, नैयायिकमूर्धन्याः महामहोपाध्यायाः विद्वांसः के.एस्. वरदाचार्यः, प्राच्यप्रतीच्यविद्याविशारदाः प्रो. शिवकुमारस्वामिनः, स्वीयशारीरक्लेशमविगणय्य केवलम् अस्माकम् अनुग्रहाय समायातानां भवतां चरणप्रणिपातपूर्वकं स्वागतं व्याहरामि । विश्वविद्यालयेन प्रदीयमानं सम्मानोपाधिं स्वीकृत्य अस्मान् कृतार्थान् गौरवान्वितांश्च विदधतु इति सम्प्रार्थये ।

अयि परमादरणीयाः स्वीयया आजीवनतपश्चर्यया समेधित-वेदशास्त्रकाव्यवाङ्मयाः आचार्याः, विश्वविद्यालयः भवतां गौरवप्रदानेन अविच्छिन्नां वाङ्मयतपस्विपरम्परां वन्दते । किमन्यद् वयमिह प्रभवेम कथयितुम् - भूयिष्ठां ते नम उक्तिं विधेम इति हि केवलम् ।

वर्षत्रयात् प्राक् लब्धजन्मनः विश्वविद्यालयस्य द्वितीयो दीक्षान्तघटिकोत्सवः। वर्षत्रयेण कालेन सम्भूय साधितं कार्यं पुनरवलोकयन्तः, भविष्यति करिष्यमाणानि कर्माणि सङ्कल्पयामः । आरम्भदिनानि नैव सुलभक्रमाणि भवन्ति । अभिजातशिशोः दन्तोद्गमदोषा इव विश्वविद्यालयस्यापि पूर्वं कर्नाटकराज्यमाध्यमिकशिक्षामण्डल्याः प्रौढशिक्षणविभागस्य च अधीनां समग्रां पारम्परिकसंस्कृतशास्त्रशिक्षाम् एकच्छत्रे समानीय एकगवाक्षव्यवस्था समुपकल्पिता । स्नातकपूर्वशिक्षानिर्वहणाय संस्कृतशिक्षण-निर्देशनालयः प्रतिष्ठापितः । अद्यत्वे अस्यां व्यवस्थायां पाठशालानाम् अनुदानप्रशासननिर्वहणं, शैक्षणिकक्रमव्यवस्थापनं, परीक्षाप्रबन्धनं च सम्यक् निर्व्यूढम् । विश्वविद्यालयस्य अधिग्रहणानन्तरं छात्रसङ्ख्या वर्धिता । पूर्वं द्वाविंशति-सहस्रपरिमिताऽधुना पञ्चचत्वारिंशत्सहस्रं यावत् विस्तृतेति मानास्पदोऽयं विषयः । नवीनपाठ्यक्रम-निर्माणार्थम् प्रथमाकक्ष्यादारभ्य साहित्यकक्ष्यापर्यन्तं सङ्कल्पितः उद्यमः सम्पूर्णः। ऐषमवर्षे नूतनपाठ्यप्रणाली अनुष्ठाने समानीयते ।

विश्वविद्यालयेन पारम्परिकशास्त्राध्ययनस्य एका नूतना दिशा प्रदत्ता । विद्वन्मध्यमा-विद्वदुत्तमा-पदव्योः पाठ्यक्रमः बि.ए. - एम्.ए. समकक्षतया व्यवस्थापितः । विश्वविद्यालयेन बि.ए. विद्वन्मध्यमा, एम्.ए. विद्वदुत्तमा



इति स्नातकस्नातकोत्तर-पदवी दीयेते । अद्यत्वे संस्कृत-शास्त्राध्ययनं सार्ववर्गिकं जातम् इति वक्तुं सन्तुष्यामि । ऐषमे वर्षे नानाशास्त्रेषु शोधकार्यस्य प्रचुरीकरणाय Master of Philosophy - विशिष्टाचार्यकक्ष्या समारब्धा यत्र पञ्चविंशतिः शोधच्छात्राः अध्ययनं कुर्वते । वर्षेऽस्मिन् Ph.D. (विद्यावारिधिः), D.Litt. (विद्यावाचस्पतिः) शोधकार्यक्रमौ अपि आरब्धौ ।

संशोधनक्षेत्रस्य प्रोत्साहनार्थं प्रवृत्तेन विश्वविद्यालयेन अस्मिन् अपि वर्षे नूतनानां त्रयाणां शोधकेन्द्राणां मान्यता प्रदत्ता । तानि च बेङ्गलूरुनगरे संस्कृतभारत्याः शोधकेन्द्रं, राष्ट्रियसंस्कृतसंस्थानेन प्राप्तानुदानं पूर्णप्रज्ञसंशोधनमन्दिरम्, उडुपिनगरस्य प्रसिद्धे गीतामन्दिरे प्रतिष्ठापितं श्रीवादिराजसंशोधनप्रतिष्ठानम् । एतानि शोधसंस्थानानि अधुनैव कृतबहुकार्याणि निरन्तरं शास्त्रसंशोधनक्षेत्रे विश्वविद्यालयस्य सहयोगेन इतोऽप्यतिशयं कार्यं विधास्यन्ति इति भावये ।

विश्वविद्यालयस्य प्रसाराङ्गद्वारा शास्त्रानुवादग्रन्थमाला, प्राच्यप्रबन्धमाला, संस्थापनाविशेषोपन्यासमाला, कर्नाटक-सारस्वतोपासकपरिचयमाला इत्यादिग्रन्थमालाः प्रकाश्यन्ते । वर्षेऽस्मिन् उज्जयिन्यां भारतसांस्कृतिकराजधन्यां प्रवृत्ते अन्ताराष्ट्रियसंस्कृतसाहित्यसम्मेलने अस्यां ग्रन्थमालायां पञ्चग्रन्थाः प्रकाशिताः । ते च- डा. एच्.आर्. विश्वासमहोदयस्य ''जग्गु शिङ्गरार्यः'', विद्वान् एच्.वि. नागराजराव् महोदयस्य ''बसवप्पशास्त्री'', विद्वान् गङ्गाधरभट्टस्य ''मण्डिक्ल रामशास्त्री'', पद्मश्री डा. बन्नञ्जे गोविन्दाचार्यमहोदयस्य ''पडमुन्नूरु नारायणाचार्यः'', डा. हित्लळ्ळी सूर्यनारायणनागेन्द्रभट्टमहोदयलिखित- ''हानग्ल विरूपाक्षशास्त्री'' इति पञ्च विद्वच्चरित्रग्रन्थाः ।

तथैव कर्नाटकसंस्कृताध्ययनम् इति नाम्ना अर्धवार्षिक-शोधपत्रिका, त्रैमासिकं वार्तापत्रं च प्राकाश्यं नीयते ।

प्रगतवर्षादारभ्य विश्वविद्यालयेन संस्कृतग्रन्थविरचनप्रोत्साहनाय कर्नाटक-राज्यस्य प्रथमसंस्कृतप्राध्यापकानां दार्शनिकानां प्रो. एम्.

हिरियण्णमहोदयानां स्मरणार्थं ग्रन्थपुरस्कार: संस्थापित: । संस्कृतवाङ्मयस्य नानाप्रकारेषु रचितानां विनूतनग्रन्थानां पुरस्कार: प्रदीयते । पुरस्कारेणानेन सभाजितानां प्रो. एन्. रङ्गनाथशर्मा, डा. बन्नञ्जे गोविन्दाचार्यसदृशानां महतां ग्रन्थकाराणां पङ्क्तौ युवान: ग्रन्थकर्तारोऽपि पुरस्कारेण प्रोत्साहिता: ।

संस्कृतं सामान्यजनान् प्रति आधुनिकशिक्षाविभागान् प्रत्यपि नेतुं अन्यान्यविश्वविद्यालयानां, विद्यालयानां, संस्थानां संयोजनेन राष्ट्रियविद्वद्गोष्ठ्य: कार्यशालाश्च समायोजिता: । विशिष्य गतमासे अस्माकं विश्वविद्यालयेन आयोजितायां प्रथमस्यां अन्ताराष्ट्रियसङ्गोष्ठ्यां मान्यै: राज्यपालमहोदयै: प्रधानभाषणं कृतमिति विश्वविद्यालयस्येतिहासपुटेषु रक्षितम् । एतादृशस्य अभूतपूर्वस्य अन्ताराष्ट्रियसम्मेलनस्य आयोजनाय कृतपरिक्षश्रमं कुलसचिवं डा. वै. एस्. सिद्देगौडमहोदयं, तथा संयोजकं डा. श्रीधरमहोदयं समभिनन्दामि । तत्र विशिष्य धारवाडनगरे विवेकानन्दकृतिसम्पदमधिकृत्य, सागरे कालिदासकाव्यकुतूहलमधिकृत्य च समायोजिता: उपन्यासमाला: उल्लेखमर्हन्ति । नैकशतकेभ्य: कर्नाटकराज्ये संस्कृतशास्त्रीय-शिक्षणपरम्परा महती अनुवर्तते । संस्कृतविद्यालया: सर्वकारीयानुदानमालम्ब्य अनालम्ब्य वा नानामठाधिपतीनां प्रोत्साहेन आश्रयेण च प्रचलन्ति । तत्र धीमन्त: विद्यावर्चस्विन: स्वाध्यायप्रवचनव्रतिन: अध्यापका: शास्त्रोपजीविन: छात्राश्च निरन्तरम् इमां परम्परां पोषयन्ति । महदिदं अभिमानस्थानं यत् प्रतिवर्षं राष्ट्रस्तरीयशास्त्रवाक्स्पर्धासु कर्नाटकच्छात्रगण: एव अत्यधिक-स्वर्णपदकानि सम्पाद्य दशकत्रयात् विजयवैजयन्तीं सम्पादयति । अस्मिन्नपि वर्षे छात्रै: महता परिश्रमेण विजयवैजयन्तीसम्पादनेन राष्ट्रस्य गौरवं वर्धितम् । एतत् राष्ट्रस्तरे अस्माकं शिक्षाया: गुणवत्ताया: चिह्नम् । प्रतिभाशालिनाम् अध्यापनशीलानां छात्राणां प्रोत्साहनं अस्माकं दायित्वम् । अभ्यस्तविद्यानां कृतश्रमाणां छात्राणां शोधकार्यार्थं छात्रवृत्ति: वर्धनीया । अध्ययनसौविध्यानि प्रदेयानि ।



वर्षेऽस्मिन् विनूतनः प्रयोगः अस्माभिः सङ्कल्पितः । बहोः कालात् क्षेत्रान्तरे कार्यं कुर्वाणानां तथा वैद्यानां, वाक्कीलानां, तन्त्रज्ञानां, गृहिणीनाम् एका अपेक्षाऽसीत् यत् विरामकाले संस्कृताध्ययनाय अवकाशः कल्पितः स्यात् । ताम् अपेक्षां पुरस्कृत्य बेङ्गलूरुनगरस्य हृदयभागे अस्मद्विश्वविद्यालयस्य केन्द्रे सन्ध्यामहाविद्यालयः आरप्स्यते, यत्र दिवा उद्योगिनोऽपि सायं संस्कृतं शास्त्राणि च अभ्यसितुं प्रभवन्ति । प्रायशः समग्रे देशे अयं सर्वप्रथमः संस्कृताध्ययनाय सन्ध्यामहाविद्यालयस्य आरम्भः इति साभिमानं निवेदयामि । अस्य प्रयोजनं सर्वे संस्कृतजिज्ञासवः प्राप्नुयुः इति आशासे ।

एवमेव, संशोधनक्षेत्रे अध्ययनक्षेत्रे च प्रगतिसम्पादनाय राष्ट्रस्तरमान्यता-सम्पादनाय गुजरातस्थसोमनाथसंस्कृतविद्यालयेन सह Vibrant Gujarath सम्मेलनावसरे मिथः सहयोगार्थम् अङ्गीकारपत्रस्य मुद्रा कृता । सोमनाथसंस्कृत-विश्वविद्यालयस्य सहयोगेन सङ्गणकक्षेत्रे नूतनपाठ्यक्रमः निर्मितः । तस्य अनुष्ठानम् इह राज्येऽपि क्रियते ।

संस्कृतस्य प्रचारार्थं प्रमाणितशिक्षाकार्यक्रम:, प्रायोगिक-शिक्षाकार्यक्रमाश्च आरप्स्यन्ते । सङ्गीत-नृत्य-ज्योतिष्य-न्याय-वैद्यक-योग-दर्शनादिशास्त्रेषु परिणतानां संस्कृतपरिचय: अनिवार्य: । तेषां कृते इमे शिक्षाकार्यक्रमा: उपकल्पिता: । विश्वविद्यालयस्य सर्वांशाभिवृद्धौ विश्वविद्यालय-सम्बद्धमहाविद्यालयीय-प्राध्यापकानां सहयोगं नितरां स्मरामि । अस्माकं विश्वविद्यालयस्य बेङ्गलूरु-मैसूरुनगरयो: घटकमहाविद्यालययो:, नवसङ्ख्याकेषु अनुदानितमहाविद्यालयेषु, अनुदानरहितेषु ऊनविंशतिमहाविद्यालयेषु च वेदवेदान्तसाहित्य-व्याकरणन्यायादिशास्त्रेषु स्नातकस्नातकोत्तरकक्ष्या: प्रचाल्यन्ते । अस्माकं महाविद्यालयेषु सेवानिरतै: नैकै: आचार्यै: विद्यावारिध्यादि-उपाधय: अर्जिता: । उडुपिस्थस्य एस्.एम्.एस्.पि.संस्कृतमहाविद्यालयस्य डा. लक्ष्मीनारायणभट्टः, मेलुकोटे-सर्वकारीयसंस्कृतमहाविद्यालयस्य डा. उमाकान्तभट्टः, बेङ्गलूरुस्थस्य पूर्णप्रज्ञसंस्कृतमहाविद्यालयस्य प्रो. हरिदासभट्टः

च प्रो. एम्. हिरियण्णग्रन्थपुरस्कारेण विभूषितः । मैसूरुमहाराजसंस्कृतकला-शालायाः प्राचार्यः डा. भाष्यंस्वामिमहोदयः राज्यप्रस्त्या विभूषितः । अस्माकं शिक्षणनिर्देशनालस्य निदेशकः सङ्कायप्रमुखश्च डा. श्रीनिवासवरखेडिमहोदयः चिन्मयमिशन् संस्थायाः अन्ताराष्ट्रीयस्वर्णपदकपारितोषकेण सम्मानितेषु प्रथमं स्थानं भजते इति सानन्दं निरूपयामि । एवम्, अस्मिन्नेवावसरे अस्माकं विश्वविद्यालये गौरवसन्दर्शकप्राध्यापकत्वेन नियुक्तानां नैकशास्त्रविशारदानां डा. रा. गणेशमहोदयानां योगदानं स्मरामि । वर्षेऽस्मिन् प्रशिक्षणपरिषदि सभ्यत्वेन कुलपतिना मया चत्वारः प्राचार्याः नियुक्ताः । ते च विद्वान् भाष्यस्वामी, विद्वान् रामचन्द्रभट्टः, विद्वान् नरसिंहभट्टः तथा विद्वान् श्रीधरशास्त्री इनाम्दार् । तेषामपि स्वागतं व्याहरामि ।

द्वितीयेऽस्मिन् दीक्षान्तघटिकोत्सवे २०११-१२तमे वर्षे परीक्षाः उत्तीर्णेषु २४९-एकोनपञ्चाशदधिकद्विशतं मध्यमस्नातकाः, १६६-षट्-षष्ठ्यधिकशतसङ्ख्याकाः उत्तमस्नातकाश्च प्रमाणपत्राणि स्वीकुर्वन्ति । तेषु नानाशास्त्रभागेषु अत्यधिकान् अङ्कान् प्राप्य नव (९), उत्तमस्तरे त्रयोदश (१३) छात्राः सर्वोत्कृष्टश्रेणीं लभन्ते । तेषां कृते पञ्चसहस्ररूप्यकैः सह पुरस्कारपत्रं प्रदीयते । एतं पुरस्कारं मान्याः उच्चशिक्षामन्त्रिणः स्वकरकमलाभ्यां प्रयच्छन्ति । आगामिवर्षेषु एतादृशानां सर्वोत्कृष्टश्रेणीभाजां च्छात्राणां स्वर्णरजतपदकानि प्रदीयन्ते । तदर्थं राज्यस्य नानाभागेभ्यः निधिस्थापनार्थम् उपादानानि प्राप्तानि ।

भारतगणराज्ये विभिन्नराज्येषु प्रतिष्ठापितेषु संस्कृत-विश्वविद्यालयेषु कर्नाटकसंस्कृतविश्वविद्यालयः वयसा कनीयान् । परन्तु, अस्माभिः कृतैः कार्यैः इतरेषां विश्वविद्यालयानां पङ्क्तौ वयमपि समुचितं स्थानं प्राप्ताः ।

अचिरादेव विश्वविद्यालयानुदानायोगस्य 12Bमान्यतायाः, राष्ट्रियमौल्याङ्कन-प्रत्यायनपरिषदः (NAAC) मान्यतायाः अर्हतां विश्वविद्यालयोऽयं सम्पादयति ।



अवसरेऽस्मिन् ससन्तोषं निवेदयितुमिच्छामि यत् या सर्वकारेण रामनगरजिल्लायां १००एकरपरिमिता भूमिः विश्वविद्यालयाय उपायनीकृता तस्याः अधिकारपत्रप्राप्त्यनन्तरं तत्र भवननिर्माणकार्यम् आरप्स्यते । तत्र प्राचीनभारतस्य वेदकालीनं गुरुकुलम्, अर्वाचीनभारतस्य ऐतिहासिकः नालन्दाविश्वविद्यालयः, आधुनिकभारतस्य विश्वप्रथितं शान्तिनिकेतनं - सर्वमेतत् आदर्शरूपेण मनसिकृत्य विश्वविद्यालयस्य परिसरनिर्माणं विधित्सितम् । एतत्स्थलं शास्त्रप्रज्ञाद्वीप इव विश्वप्रख्यातं विद्याकेन्द्रं भूयात् । सर्वकारस्य भूरि प्रोत्साहनम् अपेक्षामहे । एवमेव सामाजिकेभ्यः अपि तदर्थं निधिसङ्ग्रहकार्यमपि विश्वविद्यालयस्य दायित्वम् ।

अद्यत्वे राष्ट्रे बह्व्यः समस्याः पीडयन्ति । अत्र महिलाः असुरक्षिताः इति भावः समुत्पन्नः ङ्गयत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताःङ्ग इति भारतस्य आर्षवाक्यम् । तदर्थं युवसमुदाये महती प्रज्ञा उत्तमः संस्कारश्च जागरणीयः । तदर्थं संस्कृतविद्या अपेक्षणीया । संस्कृतेन उत्तमः संस्कारः । उत्तमसंस्कारेण उत्तमा संस्कृतिः । तेन च उत्तमं जीवनम् । तदेव एव धर्मः । तेनैव सुखमयम् ऐहिकं पारत्रिकं जीवनम् ।। "एतद्देशप्रसूतस्य सकाशादग्रजन्मनः स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः"- इति भारतदेशः आचार्यस्थानमलङ्करोति स्म । तच्च सुसंस्कृतप्रजानिर्माणेनैव साध्यम् ।

भारतस्य शक्तिः युवसमुदायः । देशस्य प्रगतिः तरुणसमाजायत्ता । शारीरेण बौद्धिकेन बलेन च तरुणाः संवलिताः भवेयुः । युवा स्यात् साधु युवाऽध्यायकः । 'आशिष्ठो द्रढिष्ठो बलिष्ठः' इति उपनिषत् । भव्यभारतनिर्माणे यूनां भवताम् आत्मसमर्पणम् अपेक्ष्यते । देशनिर्माणे न केवलं बलशालिनः, अपि तु सुसंस्कृतस्यापि तरुणसमुदायस्य अपेक्षा विद्यते । तत्र सुसंस्कृत-समाजनिर्माणे संस्कृताध्यायिनां भवतां योगदानम् अनितरसाधारणम् । वसुधैव कुटुम्बकमिति महोन्नतं ध्येयं भवतां मनसि रूढं भवेत् ।

इदं दिनं भवतां जीवने विशिष्टम्, उपाधिरयं न केवलं जीविकायै; अपि तु समाजजीवनाय कल्पेत । अस्य उपाधेः योग्यता सर्वदैव भवद्भिः रक्षणीया । शुभास्ते सन्तु पन्थानः इति मङ्गलम् आशंसमानः विरमामि ।

अवसरेऽस्मिन् अस्माकं विश्वविद्यालयस्य प्रशासनसमितेः प्रशिक्षणपरिषदः अर्थसमितेश्च सदस्यानां धन्यवादपूर्वकं स्वागतं निरूपयामि । सर्वकारस्य, विश्वविद्यालयानुदानायोगस्य, बेङ्गलूरुविश्वविद्यालयस्य अधिकारिभ्यः, कुलपतिभ्यः, अभ्यागतेभ्यः विद्वज्जनेभ्यः, संस्कृताभिमानिभ्यः, वार्ताहरेभ्यश्च हार्दं स्वागतम् ।

**सर्वे भवन्तु सुखिनः । सर्वे सन्तु निरामयाः ।**
**सर्वे भद्राणि पश्यन्तु । मा कश्चिद् दुःखभाग् भवेत् ।।**

**।। जयतु संस्कृतम् । जयतु भारतम् ।।**



# Welcome Speech of Hon'ble Vice-Chancellor

## Prof. Mallepuram G. Venkatesh

## In the Second Convocation of Karnataka Samskrit University, Bangalore

14th June 2013, Friday

Jnanajyothi Auditorium, Bangalore

# Welcome Speech

Good Morning! Welcome for the Second Convocation of Karnataka Samskrit University, I feel honoured and delighted to welcome all the guests who have accepted our invitation and be present in this function.

His Excellency, the Governor of Karnataka and the Chancellor of our University Dr. Hansraj Bhardwaj Ji, Hon'ble Minister for Higher Education and Pro-Vice Chancellor of our University Shri R.V. Deshapande Ji, esteemed chief guest and revered scholar Dr. Ramachandra G. Bhat Kotemane, Prof. Y.S. Siddegowda, Registrar of our University, distinguished scholars on the dais who receive the Honorary D.Litt. of this University, Honourable members of the Syndicate and the Academic Council, my dear colleagues, students and our guests!

Today, on the eve of Second Convocation of Karnataka Samskrit University - a specialized University

established for the development and promotion of Samskrit language and Shastras in Karnataka State - I feel immensely happy to recall the blessings and support of His Excellency during the First Convocation held in Raj Bhavan last year. For today's function, I heartily welcome His Excellency the Governor of the State and our revered Chancellor Shri. Dr. H.R. Bhardwaj Ji. His Excellency is an embodiment of our great culture, vast learning, and unique values. He has served the nation in various capacities such as Member of the Parliament, Union Minister for Law and Justice etc., for the last four decades. He is a visionary veteran political leader. Born on 17th May 1937 at Village Garhi Sampla of Rohtak District in Haryana, he had his early education at GBC High School, Rohtak. His Excellency graduated from B.M. College, Shimla, Himachal Pradesh, and did his Master's degree from Punjab University, followed by a degree in Law from Agra University. Dr. Bhardwaj Ji has been conferred awards and honorary doctorate degrees by several universities in recognition of his commendable contribution in the field of law, legal aid, and justice. A man of many interests, His Excellency has a special interest in Indian Philosophy, culture and Samskrit. He is a scholar of Samskrit. His academic interest makes us feel proud to have a great academician as our Chancellor. Right from its inception,



the Samskrit University is enjoying the patronage of His Excellency.

It is a memorable occasion for all of us to have His Excellency amidst us today by graciously consenting to preside over the Convocation. Sir, the fraternity of the University feel greatly honored and join me in sharing the pleasure of having you with us and express their gratitude. On their behalf and on my own, I welcome you, Sir, with greatest reverence and highest admiration on this auspicious key event of the University. We look forward for your advice, direction and blessings on all the occasions.

I also extend a warm welcome with equal reverence to Hon'ble Pro-Chancellor and Minister of Higher Education and Tourism, Government of Karnataka, Shri R.V. Deshapande, the Chief Guest of this function. Our beloved Minister is a very promising and dynamic senior political leader of the state. Shri R.V. Deshapande has been an activist for social justice and for the protection of Nationalist Movement. He is a man who speaks less and works more, reflecting his high degree of commitment. It is my pleasure to introduce to you, the Hon'ble Pro-Chancellor of the University, who has very recently taken the office of the Minister of the Higher Education. As soon as he took charge of Higher Education, he brought in many reforms to the

administration of Higher Education with his in-depth knowledge and vast experience. Sri Deshapande ji comes from a village of Belgaum District. He has continuously represented his constituency without a break. As a minister, he has held many portfolios in the previous Governments in the last three decades. His contributions in the development of the State are highly appreciated. Besides being a great honor, your presence, Sir, is also an inspiration for each one of us present here. With overwhelming joy and respect, I welcome you, Sir, to this Convocation and request you to present the Certificates of excellence to the students who topped in the examinations of various Shastra disciplines. On this occasion I respectfully seek the support from the Government under the able leadership of the Hon'ble Chief Minister Sri Siddaramaiah ji.

Now, I take the pleasure in introducing and welcoming today's Chief Guest Dr. Kotemane Ramachandra G. Bhat, an eminent Scholar of many Shastric disciplines, who is going to deliver the Convocation address. The erudite personality of Dr. Bhat is not easy to describe. Shri Ramachandra G. Bhat Kotemane is a versatile scholar, well-versed in Advaita Vedanta. He hails from North Karnataka region. He was born in 1949. After his initial studies, he got training in Sahitya, Nyaya and Advaita Vedanta disciplines in



Mysore Samskrit College. He started his carrier as Professor of Advaita Vedanta for a year in Medha Dakshinamurthy Vedabhavan Samskrit College, Gokarna. Later he taught Samskrit in Janaseva vidyakendra and served as Founder Acharya of Vedavijnana Gurukulam. He is best known for his Sanskrit Speech. His contributions to Vedic scholarship have made him globally well-known. He is the author of numerous works both in Sanskrit and Kannada.

He was honored with many prestigious awards, which include- Veda Vidya Nidhi Title, Swami Gangeshananda Award, Bhavabhuti Puraskar by Madhya Pradesh Government, Guru Gourava Prashasti in Pune.

On behalf of this august assembly and on my own behalf, I extend a warm welcome to Dr. Ramachandra G. Bhat Kotemane. I look forward to a great inspiration and guidance for the future of Shastric scholarship. I am confident his convocation address will be a spotlight for the University.

It is my privilege to welcome the stalwarts of Sanskrit scholarship who are very kind to accept our invitation to be with us in this galaxy of Samskrit scholars. They are - Pandit Shri Bhalachandra Shastry Joshi (who is not present today due to his ill health), Mahamahopadhyaya Vidwan K.S. Varadacharya, Vidwan Narayana Shastri

Bucchan and Professor M. Shivakumaraswamy. These scholars performed their वाङ्मय तपस् in the holy land of Karnataka and enriched Samskrit Literature and Shatric Tradition by their contributions. I firmly believe that it is as a result of their penance, we are enjoying today the status of a University. What else can we do for them, except say, 'भूयिष्ठां ते नम उक्तिं विधेम'? Respected Sirs, the University offers Honoris Causa - D.Litt to the Guruparampara through these scholars as a mark of its gratitude. On behalf of all assembled here I welcome all the honorable scholars.

This Convocation of the University is another landmark for all of us. It gives an opportunity for self appraisal for the present and for setting new aspirations for the future. I deem it my splendid privilege to utilize this opportunity to highlight the University's achievements on various fronts. Sir, this University was established in the year 2010 with the sole objective of elevating Traditional Samskrit Education and Research in the State. We are delighted to submit that with the support of Samskrit Community and the Government, the University could bring the whole traditional Shastric Education on one platform and systematize the entire administration by introducing the Single Window System in a short span of time. In order to secure the traditional learning units by bringing under one umbrella, the Govt.



established the Directorate of Samskrita Education under the University, which looks after Samskrit Pathashalas that offer the Pre-University education from Prathama Standard to Sahitya Standard. We have revised the curriculum and have been constantly conducting Quality Improvement Programs for the teachers. We have ensured the smooth administration of all these Pathashalas by creating six circles in the state and by appointing Circle Coordinators and Subject-Inspectors. We are happy to inform you that a new horizon of Sanskrit environment has been created in the state. This would serve as the basis for the Higher Education stream of the University.

As soon as the University came into existence, it took over the examination system that was previously conducted by Secondary Education Board. All colleges came under the purview of the University. Starting from reframing the syllabus and reorganising the whole system on par with that of other Universities, the University introduced a new curriculum. The University changed the nomenclature of the traditional degrees as – B.A (Samskrit/Veda) – Vidwan-madhyama and M.A (Samskrit/Veda) – Vidwaduttama. Today we are conferring these Bachelors and Masters degrees to the second batch of students. Apart from this, the University has started its first research program - Master of

Philosophy this year. The Ph.D and D.Litt. programs will be commencing from this Academic Year.

In order to promote the Samskrit Research in the State, University has given the recognition to three research centres this year. They are Samskrit Bharati Research Centre, Bangalore; Poornaprajna Research Institute funded by Rashtriya Samskrit Samsthan, and Sri Vadiraja Research Foundation, Geeta Mandir, Udupi. These are the established leading Research Institutes. With the support of the University they will expand their activities.

The Publication Wing of the University has taken up many research projects and publications. Under the translation series of Oriental works, we have already published the Vakyapadiyam of Bhartrhari with the Kannada translation by Prof. N. Ranganatha Sharma. In order to enrich Kannada literature and to reach the common Kannada reader, we are planning many translation projects, including that of Manasollasa, an encyclopedic work in Samskrit. In order to record the literary service rendered by the scholars of the pre-independent era, a series titled "Samskruta Saraswatopasakaru" has been launched. Recently in the International event held in Ujjain, Five monographs - about Sri Hanagal Virupaksha Shastri, Sri Basavappa Shastri, Sri Jaggu Shingararya, Sri Mandikal



Ramashastri and Sri Padamunnuru Narayanacharya - have been released. The University publications include a bi-annual research journal, Oriental Research Series, and a quarterly Newsletter.

In addition to these, the University has instituted special awards for Samskrit works, in memory of Late Prof. M. Hiriyanna, the first Professor of Samskrit and Philosophy in the earstwhile Mysore State. Eminent scholars like Professor N. Ranganatha Sharma, Dr. Bannanje Govindacharya, Pandit Araiyar Srirama Sharma, and many young talents too have received the award.

Samskrit should not remain isolated. Bearing this in mind, the University has stepped out of its campus and has organized many National level seminars - in association with other universities, our own affiliated colleges and institutions. Recently we held two seminars on subjects like “Bana and Nagavarma”. A workshop on Vivekananda works has been conducted in Dharwad as part of 150 year birthday celebrations of Swami Vivekananda. Similarly, last month we have conducted an International Seminar on “Human Rights and Sanatana Dharma: Implications for Global Citizenship” in association with Simpson College, Iowa, USA. His Excellency the Hon’ble Governor of our State delivered the Key Note address in this conference. This has

expanded the reach of the University beyond its campus. This is our first International event. It was a grand success because of the painstaking efforts put by our Registrar Prof. Y.S. Siddegowda, the Programme Director and Prof. M.K. Sridhar, the Programme coordinator. I appreciate the service rendered by the both.

The Karnataka state is richly endowed with an outstanding Samskrit heritage in teaching and research. The educational institutions both in public and private sectors are well-supported by many Peethadhipathis. The dedicated teachers and students are diligent and innovative in spite of many bottlenecks. We are proud to say that our brilliant students have been winning the Trophy in the National Level Elocution Competitions by bagging the highest number of gold and silver medals every year for the last three decades. This year also our students stood first in the entire nation. This shows how strong our education system is in the State. We need to nurture this in the coming days too. We need to increase new openings for our students. We need to create sufficient infrastructure and facilities. We need to encourage students by providing attractive scholarships.

This year University is establishing an evening college for Samskrit studies on a persistent demand from the public. Men and Women from various walks of



life interested in studying Samskrit will be able to do so now. This experiment is first of its kind in the history of Samskrit Education in the entire country. I hope people welcome this step and make use of this opportunity.

To reach out to the public interested in learning Samskrit for excellence in their relevant fields, like Music, Dance, Astronomy, Education, Law, Ayurveda, and Yoga , the University is going to offer these programs in distance mode by adopting the Private-Public-Partnership model.

In the Vibrant Gujarat Summit held in Ahmedabad in Jan 2013, We have signed an MOU with the Somanath Samskrit University, Gujarat. In the field of teaching and research, we share our expertise and support each other.

Here, I would like to record the eminent service rendered by the faculty of both the two constituent; nine aided and nineteen unaided affiliated Samskrit Colleges in the State. Graduate Degree and Master Degree Courses are offered in Veda, Vedanta, Sahitya, Vyakarana, Nyaya, Meemamsa, Dhamashastra, Jyothishya and so on.

This year, many of our faculty members received Ph.D. degrees. Further, Dr. Lakshminarayana Bhat, SMSP College, Udupi, Dr. Umakantha Bhat, Melukote, Prof. Haridasa Bhat, PPVP College, Bangalore bagged

Prof. M. Hiriyanna Book Awards given by the University. Dr. Bhashyam Swami, Principal, Maharaja Samskrit College, Mysore received Rajya Prashasti last year. Dr. Shrinivasa Varakhedi, Dean and Director of Directorate of Samskrit Education (who was a recipient of President award) has been honored with Sri Chinmayananda Gold Medal award from Chinmaya International Foundation Shodha Samsthan. The University is proud of these achievements. On this occasion I would like to record the services rendered by Shatavadhani Dr. R. Ganesh who is Honorary Visiting Professor of our University. This year four principals of affiliated colleges -Vidwan Bhashyam Swami, Vidwan Ramachandra Bhat, Vidwan Narasimha Bhat and Vidwan Sridharashastri Inamdar- have been nominated as the members of Academic Council by me in the capacity of Vice-Chancellor. I welcome all of them.

This year, amongst 415 students are taking degrees, 9 students who topped in their respective Shastric disciplines are being given Excellence Certificates, along with a cash award of Rs. 5000. Hon'ble Minister of Higher Education will distribute the certificates.

This is the Second Convocation of the University. This is the youngest Samskrit University among 14 Samskrit Universities in the Country. We have a long



way to go. We are only taking our first steps. We only wish that you all appreciate our humble efforts and bless us with your full support in all our future endeavour.

We are fortunate that land of the Govt. Samskrit Colleges situated in Bangalore and Mysore have been handed over to us for the activities of our University. The Govt. has sanctioned a plot of land measuring 100 acres in Ramnagar Taluk, about forty kilometers from Bangalore. The transfer process is on its way. The development activities will soon be taken up. We develop a beautiful campus in traditional Gurukula model, which resembles – Nalanda and Vishwashanti Niketan. Our inspiration is our Chancellor. We seek bequest from public and Government for the development of new campus.

In all these developments of the University untired efforts of our Registrar Prof. Y.S. Siddegowda with the support of other collogues are praiseworthy. Apart from the administration the support from honorable members of Syndicate and Academic Council is outstanding. I personally thank all of them.

**A FEW WORDS TO OUR YOUNG GRADUATES:**

The youth constitute a great strength of the nation. Development of any nation is dependent on its youth-power. Guided by our ancient principles, our youth would

become powerful - physically, intellectually, morally, emotionally, spiritually and thereby, become an asset for the nation. Here I would like to quote Swami Vivekananda who says “We are responsible for what we are, and whatever we wish ourselves to be, we have the power to make ourselves. If what we are now has been the result of our own past actions, it certainly follows that whatever we wish to be in future can be produced by our present actions; so we have to know how to act. Take up one idea. Make that the one idea of your life - think of it, dream of it, live on that idea. Let the brain, muscles, nerves, every part of your body, be full of that idea, and just leave every other idea alone. This is the way to success; that is the way great spiritual giants are produced.” Derived as it is from our Upanishadic teachings, this message stresses the importance of Sanskrit Education.

I would like to address you as the young generation which cares about our great nation. One thing is certain: You will inherit the world for better or for worse. You will inherit what we, the older generation, leave behind for you; and you will hopefully do better than what we have done in preserving this beautiful planet and the diversity of its life-forms. You will hopefully do better in achieving and maintaining peace on our planet. You will also eventually come to bear the responsibility, as each



generation does, of passing the world on intact to the next generation. Be strong, my young friends, that is my advice to you. Strength is the medicine for the world’s illnesses. Strength is life; weakness is death.

As the graduates and post-graduates of Sanskrit from our University, you are the torch-bearers of the future, and have great responsibility in building the character of our nation. You are carrying forward the traditional wealth of our heritage into the future. You are the link between modern and ancient India. Our society looks forward to your contributions. We only hope that you will not disappoint us.

The day of Convocation is a special occasion in your life as young graduates. The parchments that have been handed over in the form of degrees, signify your educational attainments. It is the beginning of another important voyage. The discipline and education which you have imbibed here, would be your first and foremost asset. In your endeavor to acquire higher positions, you may have to face a myriad trials and tribulations, sometimes bordering on struggle for existence, or even survival. Success would depend upon various factors including opportunities, aptitude and application. While you re-orient your life and attitude to tailor them to suit the requirements of the tasks that you may choose, the institution which has molded you would expect you to

remember the importance the sense of ethics and discipline in your daily dealings. Character is a matter of gradual and guided growth in which parents and teachers play a vital role. Absolute integrity, devotion to duty, moral vision, courtesy and desire to achieve perfection, a spirit of liberal and secular outlook, self-confidence and fearlessness should be your hallmark.

Dear students, you have brought laurels to this institution through your academic achievements and co & extra-curricular performances. Please remember that while discharging your duties, you must hold on to the morals and teachings that you have acquired from your parents, teachers and all the saints of this holy land. Let your personality speak through your work ethos. It is now time for you to prove yourselves worthy of the investment which this institution and your parents have made in shaping you. I would extend my heartiest congratulations to every one of you.

I offer my best wishes to all those who received degrees and prizes today. I wish to convey my deep sense of appreciation to the Honorable members of the Syndicate, the Academic Council, the Board of Studies and all the dignitaries who are present here, the Faculty, staff members and students - for their interest and continued co-operation for the development of the University. I am confident that with the involvement and



the ever-growing support from the Government of Karnataka and the UGC, our University will be in a position to meet its onerous mandate in a commendable manner, and prove to be a high-ranking institution at the national and international levels in days to come.

I once again welcome all the students and dignitaries, Media friends to this convocation.

।। जयतु संस्कृतम् । जयतु भारतम् ।।



प्रो. मल्लेपुरं जि वेङ्कटेशवर्यः १९५२तमे वर्षे जून् मासस्य ५ दिनाङ्के बेङ्गलूरुग्रामान्तरमण्डलस्य हेब्बगोडिग्रामे जनिम् अलभत ।

प्राथमिकशिक्षणं प्रौढशिक्षणं च प्राप्तं नेलमङ्गलस्थसर्वकारीयविद्यालये, हैय्स्सेकेण्डरिशालायां च । आद्याः संस्कृत-कन्नडगुरवः उ.वे. रामस्वामि अय्यङ्गार्याः । सिद्धगङ्गामठात् कन्नडपण्डित-अलङ्कारविद्वत्पदवीनां प्राप्तिः । तत्र विदुषां बि. वेङ्कटरामभट्टवर्याणां सविधे काव्यालङ्कारयोः अध्ययनम् । बेङ्गलूरुनगरीये श्रीरामकृष्णाश्रमे स्वामिभ्यः आदिदेवानन्देभ्यः वेदान्तज्ञानानुग्रहः । मैसूरु विश्वविद्यालयात् कन्नड-एम्.ए.पदव्यां तृतीयस्थानेन सह कुवेम्पु-स्वर्णपदकं, तत एव संस्कृत-एम्.ए.पदव्याम् उन्नतश्रेण्या उत्तीर्णता । कनकपुरे कन्नडशिक्षकत्वेन वृत्तेरारम्भः । ततः बेङ्गलूरुनगरे मल्लेश्वरे महानगरपालिकाप्रौढशालायां कन्नडपण्डितः । १९९२तमे वर्षे कन्नडविश्वविद्यालयप्रवेशः । तत्र प्रवाचकत्वेन, अध्ययनाङ्गस्य निर्देशकत्वेन, १९९८तमे वर्षे कुलसचिवत्वेन च दायित्वनिर्वहणम् । २००१तमे वर्षे कर्नाटकसर्वकारस्य कन्नडपुस्तकप्राधिकारस्य अध्यक्षः । २००४तमे वर्षे कन्नडविश्वविद्यालयस्य भाषानिकायस्य निकायाध्यक्षः, प्रसाराङ्गस्य च निर्देशकः । २००८तमे वर्षे कर्नाटकसंस्कृतविश्वविद्यालयस्य विशेषाधिकारित्वेन कर्नाटकसर्वकारात् नियुक्तः । २०१०तमे वर्षे मेमासस्य २६दिनाङ्के कर्नाटकसंस्कृतविश्वविद्यालयस्य प्रथमकुलपतिः ।

साहित्य-संस्कृति-भाषासम्बद्धानां पञ्चाशदधिकानां पुस्तकानां रचयिता । विविधैः विश्वविद्यालयैः, केन्द्रसाहित्य-अकाडेमी, कर्नाटक-साहित्य-अकाडेमी, देहली-कर्नाटक-सङ्घः, कर्नाटक-नाटक-अकाडेमी, कर्नाटक-जानपद-अकाडेमी, कन्नड-संस्कृति-निर्देशनालयः, कन्नड-साहित्य-परिषत्प्रभृतिभिश्च संस्थाभिः आयोजितेषु राष्ट्र-राज्यस्तरीय-विचारगोष्ठीषु उपन्यासमालिकासु च भागः गृहीतः । कर्नाटकसर्वकारात् २००९तमे वर्षे राज्योत्सवप्रशस्तिः, २००८तमे वर्षे कर्नाटक-साहित्य-अकाडेमीद्वारा गौरवप्रशस्तिः, २०११तमे वर्षे डा. बि. आर्. अम्बेड्कर् प्रशस्तिः, अस्मिन् वर्षे सिद्धगङ्गामठात् "सिद्धगङ्गाश्रीः" इति बिरुदा विभूषितः । एव तुमकूरुविश्वविद्यालयात् डि. लिट्. उपाधिः सम्प्राप्तः ।